# INTERMEDIATE - SECOND YEAR

# SANSKRIT

## MODEL PAPER

*Time: 3 Hrs* *Max.Marks: 100*

**सूचना - प्रथम,द्वितीय,तृतीयप्रश्नान् विहाय सर्वे प्रश्नाः संस्कृते एव समाधातव्याः ।**

***Note*** **:- Except Q.No's 1,2 & 3 all other questions should be answered in Sanskrit (Devanagari Script) only.**

**1. एकस्य** श्लोकस्य प्रतिपदार्थं भावं च लिखत। **1 X 8 = 8**

1) तक्षकस्य विषं दन्ते मक्षिकायास्तु मस्तके ।
वृश्चिकस्य विषं पुच्छे सर्वाङ्गे दुर्जने विषम् ।।

2) अर्थानामार्जनं कार्यं वर्धनं रक्षणं तथा ।
भक्ष्यमाणो निरादायः सुमेरुरपि हीयते ।।

**2. एकं** निबन्धप्रश्नं समाधत्त। **1 X 6 = 6**

1) दिलीपस्य धर्मनिष्ठामधिकृत्य लिखत?
2) पाठ्यभागमनुसृत्य गीर्वाणवाण्याः सारांशं लिखत ।

**3. एकं** निबन्धप्रश्नं समाधत्त। **1 X 6 = 6**

1) भोजराजाय सालभञ्जिकया उक्तं विक्रमस्य औदार्यं लिखत।
2) अप्पय्यदीक्षितेन्द्र इति पाठ्यभागसारांशं संग्रहेण विवृणुत ।

**4. त्रयाणां** प्रश्नानां समाधानानि लिखत। **3 X 2 = 6**

1) भृगुवंशकेतुः कः ?
2) कर्णभारं केन विरचितम् ?
3) द्रोणद्रुपदयोः सम्बन्धः कः ?
4) बालानां कलहः कीदृशः?
5) कालिदासश्लोके भोजेन प्राप्तं समाधानं किम् ?
6) कालिदासः महाराजं कथं सन्तोषितवान् ?

**5. द्वयोः** ससन्दर्भं व्याख्यानं लिखत। **2 X 3 = 6**

1) वदेत् क्षमं स्वामिहितं मन्त्री ।
2) चित्रार्पितारम्भ इवाऽवतस्थे ।
3) विद्या यत्र परोपकारविभवाः सा ज्ञानभूमिर्मम ।
4) सा संस्कृताख्या सुकृतैकलभ्या ।

**6. द्वयोः** ससन्दर्भं व्याख्यानं लिखत। **2 X 3 = 6**

1) सतां सङ्गो हि भेषजम् ।
2) सत्पुत्रेण कुलं नृपेण वसुधा लोकत्रयं भानुना ।
3) क्षणे क्षणे किल परिक्षीयते बालस्य दशा।
4) राजा तं कनकाभिषेकेण सत्कृतवान् ।

**7. त्रयाणां** प्रश्नानां समाधानं लिखत। **2 X 3 = 6**

1) नराः क इव रणे सीदन्ति ?
2) दिलीपेन सेव्यमानं नन्दिनीधेनुं कः चकर्ष?
3) पृथिव्यां त्रीणि रत्नानि कानि?
4) अस्पृशन्नेव वित्तानि कः परेभ्यः प्रयच्छति?
5) देवगिरीणां पञ्च नामानि लिखत?
6) संस्कृताख्या वाणी कीदृशी?

**8. त्रयाणां** प्रश्नानां समाधानं लिखत। **2 X 3 = 6**

1) मन्दविषो नाम सर्पः कुत्र वसति?
2) ब्राह्मणः पुत्रप्राप्त्यर्थं कीदृशं व्रतमाचरितवान्?
3) धर्मपालकस्य कति पुत्राः? ते च के?
4) वैद्यः श्रीधरं प्रति किमुक्तवान् ?
5) मञ्जुहासिनी का?
6) अप्पय्यदीक्षितः कुत्र जन्म लेभे ?

**9. एकेन** वाक्येन समाधत्त। **5 X 1 = 5**

1) रणे रामेण कः हतः?
2) मुनिहोमधेनुः का?
3) यावज्जीवं कः दहेत्?
4) अनुष्ठानसमये मुनयोऽपि कीदृशाः भवन्ति?
5) चिरसम्प्रदायरुचिराः के?

**10. एकेन** वाक्येन समाधत्त। 5 X 1 = 5

1) मण्डूकनाथः कः?
2) विक्रमार्कचरितं केन विरचितम्?
3) राजहंसस्य पत्नी का?
4) श्रीधरस्य मातुः नाम किम्?
5) श्रीधरस्य ज्येष्ठभ्रातृवत् कः वर्धते?

**11. अधोनिर्दिष्टकथां पठित्वा प्रश्नानां समाधानानि दत्त।** 1 X 5 = 5

चित्रकूटपर्वतनिकटतपोवनमध्ये मनोहरः कश्चित् देवालयोऽस्ति। तत्र च पर्वते अत्युदग्रात् शिखरात् विमला कापि जलधारा पतति। तत्र स्नानमात्रेण महापातकादीन्यपि नश्यन्ति। किञ्च, यस्तु पापीयान् स्नानमाचरति तस्य देहात् अतीव कलुषमुदकं निस्सरति। तेन सः पूतो भवति। अन्यच्च तत्र कश्चित् ब्राह्मणो महति होमकुण्डे प्रतिदिनं होमं करोति। न जाने तस्य कति वत्सरा गता इति। प्रतिदिनं कुण्डाद्बहिः प्रेरितं भस्म पर्वताकारम् अस्ति। स केनापि न भाषते। एवमतिविचित्रं स्थानमद्राक्षीदयं जनः।

**प्रश्नाः**

1. देवालयः कुत्र अस्ति?
2. जलधारा कस्मात् पतति?
3. प्रतिदिनं होमकुण्डे कः होमं करोति?
4. जनः कीदृशं स्थानमद्राक्षीत्?
5. कस्य देहात् अतीव कलुषमुदकं निस्सरति?

**12. चत्वारि** सन्धिनामनिर्देशसहितं विघटयत। 3 X 2 = 6

1) मनस् + चलति
2) पेस् + टा
3) तत् + अपि
4) वाक् + मयम्
5) सः + अपि
6) नृपतिः + जयति

**13. चत्वारि** सन्धिनामनिर्देशसहितं सन्धत्त। 3 X 2 = 6

1) जगज्जननी
2) उड्डयनम्
3) षडाननः
4) तन्मात्रम्
5) शिवोऽहम्
6) कविरायाति

**14. द्वयोः** शब्दयोः अन्त - लिङ्ग - वचनमात्रनिर्देशसहितं रूपाणि लिखत। 2 X 6 = 12

1) भवत्
2) स्रक्
3) पचत्
4) एतद् (पुं)

**15. द्वयोः** धात्वोः निर्दिष्टानि लकाररूपाणि लिखत। 3 X 2 = 6

1) वृक्षमूलम्
2) विन्ध्यपर्वतः
3) त्रिलोकी
4) धर्मार्थकामाः
5) शाकप्रति
6) दण्डादण्डि

**16. अधोरेखाङ्कितपदानि शुद्धीकृत्य वाक्यानि लिखत।** 5 X 1 = 5

| | | |
|---|---|---|
| गणेशः | सत्यं | खादिष्यति |
| कृष्णः | फलं | करिष्यति |
| त्वं | ग्रामं | पठिष्यामि |
| रामः | कदा | वदिष्यति |
| अहं | पाठं | गमिष्यसि |

Shiva Nageswara Sharma